तां पक्कां साधयेच्छीघ्रं भिषगन्यानचिकित्सया" ॥
इति भावप्रकाशः ॥

कच्छुरुहा, स्त्री, (कच्छे रोहति या । कच्छ + रुह् + इगुपधेति कः । ३ । १ । १३५ । स्त्रियां टाप् च ।) दूर्व्वा । इति जटाधरः ॥

कच्छा, स्त्री, (कचं पश्चात्प्रदेशं छादयतीति । छद् + णिच् + डः पृषोदरादित्वात् ह्रस्वः । टाप् च । कचश्छाद्यतेऽनया वा ।) परिधानापराञ्चलम् । इति हेमचन्द्रः ॥ चीरिका । झिँझी पोका इति भाषा । वाराही । इति मेदिनी ॥

कच्छाटिका, स्त्री, (कच्छ एव बाहुलकात् अटन् ततः स्वार्थे कन् टाप् च ।) कच्छटिका । इति शब्दरत्नावली ॥

कच्छुः, स्त्री, (कषति देहं । कष हिंसायां + "कषच्छ-श्चेति" १।८६। उणां ऊ छान्तादेशश्च ।) पृषोदरादित्वात् वा ह्रस्वः । रोगविशेषः । तस्य लक्षणम् ।

"सूक्ष्मा बह्वाः पिडकाः स्रावयत्यः
पामेत्युक्ता कण्डूमत्यः सदाहाः ।
सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरुग्रास्फिचोश्च" ॥

इति निदानम् ॥ तच्चिकित्सा यथा ।

"अर्कपत्ररसे पक्कं हरिद्राकल्कसंयुतम् ।
नाशयेत् सार्षपं तैलं पामाकच्छुविचर्च्चिकाम्" ॥
इति अर्कतैलम् ॥१॥

"मनःशिलालं कासीसं गन्धाश्मा सिन्धुजन्म च ।
स्वर्णक्षीरी शिलाभेदी शुण्ठी कुष्ठञ्च मागधी ॥
लाङ्गलीरत्नोरश्च ददुघ्नः कृमिहानलः ।
दन्ती निम्बदलश्चैभिः पृथक् कर्षमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम् ।
अर्कक्षीरस्नुहदुग्धेन पृथक् पलमितेन च ॥
गोमूत्रस्याढ़केनापि शनैर्मृद्वग्निना पचेत् ।
अभ्यङ्गेन हरेदेतत् कच्छुदुःसाध्यतामपि ॥
पामानञ्च तथा कण्डूं त्वग्व्याधिवधिरामयान् ।
कच्छुराक्षसनामेदं तैलं हारीतभाषितम्" ॥
कच्छुराक्षसनाम तैलम् ॥२॥ इति भावप्रकाशः ॥
("अवल्गुजं कासमर्दं चक्रमर्दं निशायुतम् ।
माणिमन्थेन तुल्यांशं मस्तुकाञ्जिकपेषितम् ।
कच्छुं कण्डूं जयन्त्युग्रां सिद्धत्रयप्रयोगराट् ॥
कोमलं सिंहास्यदलं सनिशं सुरभिजलेन पिष्टम् ।
दिवसत्रयेण नियतं क्षपयति कच्छुं विलेपनतः ।
हरिद्राकल्कसंयुक्तं गोमूत्रस्य पलद्वयम् ।
पिबेन्नरः कामचारी कच्छुपामाविनाशनम् ॥
शोथपाण्ड्वामयहरी गुल्ममेहकफापहा ।
कच्छुपामाहरी चैव पथ्या गोमूत्रसाधिता ॥*॥
स्वरसेऽपि च दूर्व्वायाः पचेत्तैलं चतुर्गुणम् ।
कच्छुविचर्च्चिका-पामा अभ्यङ्गादेव नाशयेत्" ॥
इति दूर्व्वाद्यं तैलम् ॥ * ॥
"सोमराजी हरिद्रे द्वे सर्षपारग्वधं गदम् ।
करञ्जवीजैड़गजं गर्भं दत्त्वा विपाचयेत् ॥
तैलं सर्षपसम्भूतं नाड़ीदुष्टव्रणापहम् ।
अनेनाशु प्रशाम्यन्ति कुष्ठान्यष्टादशैव तु ॥
नीलिकापि पुरोव्यङ्गगम्भीरं वातशोणितम् ।
कण्डूकच्छुप्रशमनं कच्छुपामा विनाशनम्" ॥
इति सोमराजीतैलम् ॥ * ॥
इति चक्रपाणिकृतसंग्रहः ॥)

कच्छुघ्नी, स्त्री, (कच्छुं हन्ति या । कच्छु + हन् + टक् + ङीप् ।) पटोलः । हपुषाभेदः । इति राजनिर्घण्टः ॥

कच्छुरः, त्रि, (कच्छूरस्त्यस्य । "कच्छ्वा ह्रस्वत्वञ्चेति" रः । ह्रस्वश्च । पा । ५ । २ । १०७ । वार्त्तिके ।) कच्छुरोगयुक्तः । खोसरोगी इति भाषा । तत्पर्य्यायः । पामनः २ । इत्यमरः ॥ २ । ६ । ५८ पुंश्चलः । इति मेदिनी ॥

कच्छुरा, स्त्री, (कच्छुं कण्डूरोगं राति ददातीति । आत इति कः । टाप् च । पृषोदरादित्वात् ह्रस्वः पूर्व्वस्य । यद्वा कच्छूः साध्यत्वेनास्ति अस्यां ह्रस्वश्चेति केषाञ्चिन्मतम् ।) शूकशिम्बी । शटी । दुरालभा । इति मेदिनी ॥ यवासः । इति राजनिर्घण्टः ॥ ग्राहिशीटकः । इति रत्नमाला ॥ चौरड इति भाषा ॥

कच्छूः, स्त्री, (कषति हिनस्ति देहं "कषेश्छश्च" । इति ऊः । १ । ८६ । उणां ।) रोगविशेषः । खोस् पाँचड़ा इति भाषा । तत्पर्य्यायः । पाम २ पामा ३ विचर्च्चिका ४ । इत्यमरः ॥ २ । ६ । ५६ ॥

कच्छूमती, स्त्री, (कच्छूः साधनत्वेनास्त्यस्यां अस्त्यर्थे मतुप् ततो ङीप् ।) शूकशिम्बी । इति शब्दचन्द्रिका ॥

कच्छोटिका, स्त्री, (कच्छ + अटन् वा कन् । अत इत्वं टाप् च । पृषोदरादित्वात् ओकारादेशः ।) कच्छः । इति हेमचन्द्रः । काछा इति भाषा ॥

कच्छोरं, क्ली, (केन शिरसा शरीरेण वा कुर्य्यते लिप्यते इति । क + कुर छेदे + कर्म्मणि घञ् ।) शटी । इति रत्नमाला ॥

कच्ची, स्त्री, (कचते दीप्यते शोभते । कच् उन् । ततः कचुशब्दात् ङीप् ।) कन्दविशेषः । कचु इति ख्याता । तत्पर्य्यायः । वितण्डा २ । इति जटाधरः ॥ अस्या गुणाः । भेदकत्वम् । गुरुत्वम् । कटुत्वम् । आमवायुपित्तकारित्वम् । पिच्छिलत्वञ्च । इति राजवल्लभः ॥
("कच्ची सरा गुरुः सामवातकृत् कटुपित्तला" ॥
इति वैद्यकद्रव्यगुणे ॥) कचु इति हिन्दीभाषा ॥
"महिषासुरयुद्धेषु कच्चीरूपासि सुव्रते ।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे" ॥
इति शारदीयदुर्गार्च्चापद्धतिः ॥

कज, इ रुहे । जन्मनि । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ इ कञ्जारः । रुहो जन्म । क्तञोः कभावे इति भावे कः । इति दुर्गादासः ॥

कजं, क्ली, (के जले जायते जातं वा । जन + कर्त्तरि + डः ।) कमलम् । इति राजनिर्घण्टः ॥

कज्जलं, क्ली, (कु कुत्सितं जलं यस्मात् शुभ्रमपि जलं संयोगात् स्वकर्णत्वं नयतीति यावत् यद्वा कुत्सितं ऊर्द्धगं चक्षुषोर्जलं दूरीभूतं भवत्यस्मात् । कोः कदादेशः ।) अञ्जनम् । इति हेमचन्द्रः ॥ काजल इति भाषा । तत्पर्य्यायः । सोचकः २ । इति त्रिकाण्डशेषः ॥
("ततः साकारयद्भूरि चेटीभिः कुण्डकस्थितम् ।
कस्तूरिकादिसंयुक्तं कज्जलं तैलमिश्रितम्" ।
इति कथासरित्सागरे । ४ । ४७ ॥ तथा, भागवते ६ । २ । २७ ।
"धिक्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्" ॥)

कज्जलः, पुं, (कत् कुत्सितं यथा तथा जालयति आच्छादयति आतपादिकं । यद्वा कुत्सितमपि लतागुल्मादिकञ्चेति यावत् जालयति जीवयति वर्षणेनेतिशेषः । कु + जल् + णिच् अच् ततो ह्रस्वः ।) मेघः । इति शब्दमाला ॥

कज्जलध्वजः, पुं, (कज्जलं ध्वज इव यस्य ।) दीपः । इति त्रिकाण्डशेषः ॥

कज्जलरोचकः, पुं क्ली, (कज्जलं रोचयति । दीपेनोद्भासयति । कज्जल + रुच् + णिच् ततोऽच् स्वार्थे कन् । ण्वुल् वा ।) दीपाधारः । पिलसुज् देरको इत्यादि भाषा । तत्पर्य्यायः । कौमुदीवृक्षः २ दीपवृक्षः ३ शिखातरुः ४ दीपध्वजः ५ । इति जटाधरः ॥ ज्योत्स्नावृक्षः ६ । इति त्रिकाण्डशेषः ॥

कज्जली, स्त्री, (कु कुत्सितं जलति जीवतीति । जल + टक् ङीप् च कोः कत् । यद्वा कुत्सितं रोगयुक्तम् जालयति आरोग्यं नयति । जल + णिच् + अच् गौरादित्वात् ङीष् ह्रस्वश्च । यद्वा कज्जलमिवाचरतीति कद् + जल् + क्विप् + अच् ङीष् च ।) मत्स्यविशेषः । तत्पर्य्यायः । कज्जला २ अनन्ता ३ इति शब्दरत्नावली ॥ मिश्रितरसगन्धकम् । (यथा
"गन्धकेन रसं प्राज्ञः सुदृढ़ं मर्द्दयेद्भिषक् ।
कज्जलाभो यथा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
असौ रोगचयं हन्यादनुपानस्य योगतः" ॥
इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

कज्वलं क्ली, (कं ऊर्द्धगतं चक्षुषोर्जलं चक्षुरोगविशेषं ज्वालयति शोषयति नाशयतीति यावत् । ज्वल + णिच् + अच् ह्रस्वश्च ।) कज्जलम् । इति त्रिकाण्डशेषः ॥

कञ्चटं, क्ली, (कञ्चते दीप्यते लतादामादिभिः शोभते इति भावः । कचि + अटच् ।) जलजशाकविशेषः । काँचड़ादाम इति भाषा । तत्पर्य्यायः । जलभूः २ लाङ्गली ३ । इति शब्दचन्द्रिका ॥ शारदी ४ तोयपिप्पली ५ शकुलादनी ६ । इति रत्नमाला जलतण्डुलीयम् ७ । इति भावप्रकाशः ॥ तस्य गुणाः । श्लेष्मकारित्वम् । धारकत्वम् । हिमत्वम् । पित्तरक्तनाशित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अपि च । तिक्तत्वम् । वायुहरत्वञ्च । इति भावप्रकाशः ॥

कञ्चड़ः, पुं, (कञ्चते बध्नाति मध्यगतं मनुष्यादिजीवम् । कचि धातोरड़न् बाहुलकात् इदित्वान्नुम् । कञ्चते शोभते वा ।) कञ्चटप्रभेदः । तत्पर्य्यायः । कञ्चटः २ काचः ३ चक्रमर्द्दः ४ अम्बयः ५ । इति शब्दचन्द्रिका ॥

कञ्चारः, पुं, (कचेर्भावे घञ् कचं प्रकाशं तं ऋच्छति प्राप्नोतीति ऋ + कर्म्मण्यण् । अथवा कं पृथ्वीं चारयति चालयति यद्वा कं जलं चारयति निजरश्मिभिरितिशेषः । कचि + णिच् अच् । कर्म्मणि उपपदे अण् वा ।) सूर्य्यः । इति जटाधरः ॥